© 2017 IJSRST | Volume 3 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section : Science and Technology
doi : https://doi.org/10.32628/IJSRST

# Critical Study of Indiriya as Illustrated in Vedanta Philosophy in the light of Yoga and Ayurveda

# वेदान्तशास्त्रानुसारम् इन्द्रियस्वरूपविचार:, योगायुर्वेदशास्त्रदृष्ट्या तद्विमर्शश्च

**Prajwal J**
Department of Advitha Vedantha, Rashtriya Sanskrit Sansthan, India

**सारांश:-** आत्माभिन्नं ब्रह्म प्रतिपादयत् वेदान्तशास्त्रं जीवं संसारसागरात् तारयति। योगायुर्वेदशास्त्रे अपि मनस: शरीरस्य च स्वास्थ्यसम्पादनद्वारा वेदान्तशास्त्रस्य लक्ष्यमेव साधयत:। अत: त्रयाणामपि शास्त्राणां समन्वयेन अध्ययनं कार्यम्। अस्मिन् शोधप्रबन्धे त्रयाणामपि शास्त्राणां प्राध्यान्येन दृष्ट्या इन्द्रियस्वरूपविचार: क्रियते। इन्द्रियस्वरूपविषये त्रिष्वपि शास्त्रेषु सहमति: वैमत्यं च अत्र प्रदर्श्यते। किञ्च यत्र वैमत्यं तत्र कस्य मतस्य प्रामाण्यं स्वीकार्यमित्यपि अत्र श्रुति–युक्ति–प्रमाणै: निरूपणं क्रियते। एवमयं शोधप्रबन्ध: अध्येतृणाम् उपयोगाय भवति इति इच्छामि।

**मुख्य: शब्द:** - वेदान्त:, योग:, इन्द्रियम् , मोक्ष:, संख्या, रोग:, ज्ञानेन्द्रियम्, कर्मेन्द्रियम्, अधिष्ठानम्, इन्द्रियारिष्टम्, मोक्ष:।

**1.1. इन्द्रियविचार:-** इन्द्रस्य आत्मन: लिङ्गमिति[1] व्युत्पत्त्या चक्षुरादीनि मन:सहितानि एकादशसङ्ख्याकानि इन्द्रियाणि श्रुतिस्मृतिप्रसिद्धानि। यदि इन्द्रस्य लिङ्गमित्येव व्युत्पत्त्या वागादीनि इन्द्रियाणि उच्यन्ते तर्हि प्राणापानादय: वायव: अपि आत्मन: लिङ्गानि इति तेऽपि इन्द्रियाणि स्यु:। यदि रूपाद्यालोचनकरणता इति इन्द्रियाणां लक्षणं तर्हि आलोकस्यापि इन्द्रियत्वं सिद्ध्यति। अत: भामत्यां "देहाद्यधिष्ठानत्वे सति रूपाद्यालोचनकरणत्वम्"[2] इति इन्द्रियलक्षणं प्रतिपादितम्। इन्द्रस्य लिङ्गमिति व्युत्पत्तिस्तु "गच्छति इति गौ:" इतिवदेव अभ्युपेया। गच्छन्ति इति कारणात् न सर्वं गमनशीलं गोशब्देन गृह्यते, सास्नादिमान् एव प्राणिविशेष: गृह्यते। एवमेव इन्द्रियशब्देन एकादशानामेव इन्द्रियाणां ग्रहणं करणीयम्। अपि च प्राणानां स्थित्युत्क्रान्तिभ्यां देहधारण–पतनहेतुत्वं, न इन्द्रियाणामिति[3] प्राणादिभ्य: भिन्नानि वागादीनि इन्द्रियाणि अभ्युपेयानि। योगायुर्वेदशास्त्रयो: अपि प्राणादिभ्य: भिन्नानि वागादीनि तत्त्वान्तराणि एव इन्द्रियत्वेन अभ्युपगतानि इति अग्रे निरूपयिष्यते। अस्मिन् अध्याये एतेषामिन्द्रियाणामुत्पत्ति:, सङ्ख्याविचार:, ज्ञानेन्द्रियकर्मेन्द्रियभेदा:, प्रत्यक्षादिप्रमायां सहकारिता, दोषा:, स्वास्थ्योपाया:, अधिष्ठात्र्य: देवता: इत्यादय: विचारा: वेदान्त–योग–आयुर्वेदशास्त्रोक्तरीत्या विचार्यते।

**1.2. इन्द्रियाणामुत्पत्ति:–** प्रथमे अध्याये उक्तरीत्या समग्रमिदं जगत् परमात्मन एव उत्पद्यते। अत: इन्द्रियाणामपि उत्पत्ति: परमात्मन एव भवति। उक्तमपि – "एतस्माज्जायते प्राणो मन: सर्वेन्द्रियाणि च"[4] इति। त्रिगुणात्मकमायापरिच्छिन्नात् परमात्मन: आकाशादीनां सूक्ष्मभूतानाम् उत्पत्त्यनन्तरम् इन्द्रियाणामुत्पत्तिर्भवति। तत्र इन्द्रियेषु तत्तत्कार्यानुसारं ज्ञानेन्द्रियं कर्मेन्द्रियमिति च विभाग: दृश्यते। यद्यपि आकाशदीनि भूतानि त्रिगुणमायाकार्यत्वात् त्रिगुणात्मकानि, तथापि इन्द्रियाणामुत्पत्तौ कुत्रचित् सत्त्वगुणस्य कुत्रचित् रजोगुणस्य प्राधान्यमिति शास्त्रकारा: वदन्ति। तत्र ज्ञानेन्द्रियाणामुत्पत्तौ आकाशादीनां सत्त्वगुणस्य प्राधान्यं, कर्मेन्द्रियाणामुत्पत्तौ रजोगुणस्य प्राधान्यमिति तेषां वच:। एवं सत्त्वगुणप्रधानात् आकाशात् श्रोत्रेन्द्रियस्य, वायो:

---

[1]. भामती (सू.भा.) 2/4/17
[2]. भामती (सू.भा.) 2/3/17
[3]. सू.भा. (सू.भा.) 2/4/19
[4]. मुं.उ.2/1/3

Received : 05 Dec 2017 | Accepted : 25 Dec 2017 | November-December-2017 [(3)8 : 2129-2143]

त्वगिन्द्रियस्य, तेजसः चक्षुरिन्द्रियस्य, अद्भ्यः जिह्वेन्द्रियस्य, पृथिव्याः घ्राणेन्द्रियस्य उत्पत्तिः भवति। तदुक्तं – "एतैश्च सत्त्वगुणोपेतैः पञ्चभूतैः व्यस्तैः पृथक् पृथक् क्रमेण श्रोत्र-त्वक्-चक्षू-रसन-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि जायन्ते"[5] इति। एवमेव रजोगुणप्रधानात् आकाशात् वागिन्द्रियस्य, वायोः पाणीन्द्रियस्य, अग्नेः पादेन्द्रियस्य, अद्भ्यः पाय्विन्द्रियस्य, पृथिव्या उपस्थेन्द्रियस्य उत्पत्तिः भवति। तदुक्तं – "एतैरेव रजोगुणोपेतैः पञ्चभूतैः व्यस्तैः यथाक्रमं वाक्-पाणि-पाद-पायु-उपस्थानि च कर्मेन्द्रियाणि जायन्ते"[6] इति।

आयुर्वेदिनः अपि वेदान्तिन इव पञ्चभ्यः आकाशादिभ्यः सूक्ष्मभूतेभ्यः चक्षुरादीनां उत्पत्तिं प्रतिपादयन्ति। "पञ्चेन्द्रियद्रव्याणि – खं वायुर्ज्योतिरापो भूरिति"[7] इति प्रतिपाद्य "पञ्चभूत-विकारसमुदायात्मकानामपि सतामिन्द्रियाणां तेजः चक्षुषि, खं श्रोत्रे, घ्राणे क्षितिः, आपः रसने, स्पर्शने अनिलः विशेषेण उपपद्यते"[8], "एकैकाधिकुयक्तानि खादीनामिन्द्रियाणि तु"[9] इति आकाशादिभ्यः पृथक् पृथक् क्रमेण इन्द्रियाणामुत्पत्तिः निरूपिता।

योगमते तु इन्द्रियाणां भूतेभ्यः उत्पत्तिः न अङ्गीक्रियते। ईश्वरानुग्रहात् त्रिगुणसाम्यावस्थारूपात् प्रधानात् महत्तत्त्वस्य, ततः अहङ्कातत्त्वस्य च उत्पत्तिः भवति। तत्र सत्त्वगुणप्रधानात् अहङ्कारात् ज्ञानेन्द्रियाणां, रजोगुणप्रधानात् कर्मेन्द्रियाणाम् उत्पत्तिः भवति इति ते वदन्ति। उक्तञ्च – "श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि बुद्धीन्द्रियाणि, वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि, एकादशं मनः सर्वार्थम्। इत्येतान्यस्मितालक्षणस्य अविशेषस्य विशेषाः"[10] इति। अयञ्च क्रमः श्रुतिन्यायविरुद्धः इति तृतीये अध्याये एव अस्माभिः निरस्तः।

**1.3. इन्द्रियाणां सङ्ख्याविचारः-** इन्द्रियाणां सङ्ख्याविषये श्रुतिषु एव परस्परं विरोधः दृश्यते। कुत्रचित् "सप्तप्राणाः प्रभवन्ति तस्मात्"[11] इति सप्तसङ्ख्याकानि इन्द्रियाणि श्रूयन्ते। कुत्रचित् "अष्टौ ग्रहाः अष्टौ अतिग्रहाः"[12] इति अष्टौ इन्द्रियाणि श्रूयन्ते। क्वचित् "नव पुरुषे प्राणाः नाभिर्दशमी" इति दश एव इन्द्रियाणि निर्दिश्यन्ते। कुत्रचित् "दशेमे पुरुषे प्राणाः आत्मैकादश"[13] इति एकादशेन्द्रियाणि निर्दिष्टानि। "सर्वेषां स्पर्शानां त्वगेकायनम्"[14] इति द्वादश, "चक्षुश्च द्रष्टव्यं च"[15] इति त्रयोदश इन्द्रियाणि कुत्रचित् श्रुतिषु निर्दिष्टानि। किन्तु जीवस्य प्रपञ्चे एकादशविधानि एव कार्यजातानि वर्तन्ते इति हेतोः एकादशसङ्ख्याकानि एव इन्द्रियाणि इति वेदान्तनिर्णयः। तदुक्तं- "न त्वेकादशेभ्यः कार्यजातेभ्यः अधिकं कार्यजातमस्ति, यदर्थम् अधिकं करणं कल्प्यते"[16] इति। तस्मात् एकादश एव इन्द्रियाणि इति सिद्धम्। तानि च पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि अन्तःकरणं च। तदुक्तं – "शब्दस्पर्शरूपरसगन्धविषयाः पञ्चबुद्धिभेदाः तदर्थानि पञ्चबुद्धीन्द्रियाणि, वचन-आदान-विहरण-उत्सर्गानन्दाः पञ्च कर्मभेदाः तदर्थानि च पञ्चकर्मेन्द्रियाणि, सर्वार्थविषयं त्रैकाल्यवृत्ति मनस्तु एकमनेकवृत्तिकम्"[17] इति।

योगिनः एकादशेन्द्रियाणि प्रतिपादयन्ति। उक्तञ्च – "श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि बुद्धीन्द्रियाणि, वाक्-पाणि-पाद-पायु-उपस्थानि कर्मेन्द्रियाणि, एकादशं मनः सर्वार्थम्"[18] इति।

---

5. वे.परि.विषय.पृ.सं 337
6. वे.परि.विषय.पृ.सं 338
7. चरक.सूत्र.8/9
8. चरक.सूत्र.8/14
9. चरक.शारीर.1/24
10. व्यासभाष्यम् (यो.सू.) 2/19
11. मुं.उ.2/1/8
12. वृ.उ.3/2/1
13. बृ.उ.3/9/4
14. बृ.उ.2/4/11
15. प्र.उ.4/8
16. सू.भा.2/4/6
17. सू.भा.2/4/6
18. व्यासभाष्यम् (यो.सू.) 2/19

सुश्रुते "तत्र वैकारिकाहङ्कारात् तैजससहायात् तल्लक्षणान्येव एकादशेन्द्रियाणि उत्पद्यन्ते। तद्यथा श्रोत्र-त्वक्-चक्षुर्-जिह्वा-घ्राण-वाक्-हस्त-उपस्थ-पायु-पाद-मनांसि इति। तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि पञ्च कर्मेन्द्रियाणि उभयात्मकं मन:"[19] इति साङ्ख्यीयमतमनुवदन् एकादश इन्द्रियाणि अनुमतानि। चरके अपि "पञ्च कर्मानुमेयानि येभ्यो बुद्धि: प्रवर्तते"[20] इत्यादिरूपेण पञ्च बुद्धीन्द्रियाणि, "कर्मेन्द्रियाणि पञ्चैव"[21] इत्यादिरूपेण पञ्च कर्मेन्द्रियाणि, "इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते"[22] इति मन:, इत्येवम् एकादश एव इन्द्रियाणि अङ्गीकृतानि।

**1.4. ज्ञानेन्द्रयाणि कर्मेन्द्रयाणि च**- बाह्यप्रपञ्चस्य विषयाणां पञ्चानां ज्ञानार्थं साधनानि ज्ञानेन्द्रियाणि। एतेषां बुद्धीन्द्रियाणि इत्यपि व्यवहार: दृश्यते। तानि च श्रोत्र-त्वक्-चक्षु:-जिह्वा-घ्राणाख्यानि[23]। तत्र श्रोत्रेन्द्रियम् अकाशादुत्पन्नं शब्दस्य ग्राहकम्। श्रोतेन्द्रियस्य दिक् अधिष्ठात्री देवता। वायो: उत्पन्नं त्वक् स्पर्शज्ञानकारकम्। त्वचां वात: अधिष्ठात्री देवता। रूपग्राहकं तेजस: उत्पन्नं चक्षु:। चक्षुष: अर्क: अधिष्ठात्री देवता। अद्भ्य: उत्पन्ना जिह्वा रसज्ञानसाधिका। जिह्वाया: वरुण: अधिष्ठात्री देवता। पृथिव्या: उत्पन्नं घ्राणेन्द्रियं गन्धज्ञानं कारयति। घ्राणस्य अश्विनीकुमारौ देवते[24]।

लौकिकानां कर्मणां पञ्चानां साधनानि कर्मेन्द्रियाणि। तानि च वाक्-पाणि-पाद-पायु-उपस्थाख्यानि[25]। तत्र आकाशादुत्पन्नं वागिन्द्रियं वचनस्य कर्मण: साधनम्। तस्य वह्नि: अधिष्ठात्री देवता। वायोरुत्पन्नं पाणीन्द्रियम् आदानसामान्यस्य कर्मण: साधनम्। तस्य इन्द्र: अधिष्ठात्री देवता। तेजस: उत्पन्नं पादेन्द्रियं विहरणसामान्यस्य कर्मण: साधनम्। तस्य उपेन्द्र: अधिष्ठात्री देवता। अद्भ्य: उत्पन्नं पाय्विन्द्रियम् उत्सर्गस्य कर्मण: साधनम्। तस्या: मृत्यु: अधिष्ठात्री देवता।

पृथिव्या: उत्पन्नमुपस्थेन्द्रियम् आनन्दस्य साधनम्। तस्य प्रजापति: देवाता[26]।

योगिन: अपि ज्ञान-कर्मेन्द्रियो: एवमेव कार्याणि वर्णयन्ति। तदुक्तं साङ्ख्यकारिकायाम् -

**"रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति:।**

**वचानादविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥"**[27] इति।

तद्व्याख्याने च विवृतम् - "शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान् बुद्ध्यन्ते अवगच्छन्ति इति पञ्च बुद्धीन्द्रियाणि।...कर्म कुर्वन्ति इति कर्मेन्द्रियाणि। तत्र वाग्वदति, हस्तौ नाना व्यापारं कुरुत:, पादौ गमनागमनम्, पायुरुत्सर्गं करोति, उपस्थ: आनन्द: प्रजोत्पत्त्या"[28] इति।

आयुर्वेदशास्त्रे अपि एवमेव ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च निरूपणं दृश्यते। यद्भूतविषेशप्रधानमिन्द्रियं विशेषात् तदात्मकमेव अर्थं गृह्णाति इति तेषामपि वाद:। अत: शब्दस्पर्शरूपरसगन्धा: क्रमश: श्रोत्रत्वक्चक्षुरसनघ्राणानां विषया: इति प्रतिपादितम्। उक्तञ्च- "पञ्चेन्द्रियार्था: शब्दस्पर्शरूपरसगन्धा:"[29] इति। कर्मेन्द्रियाणि तेषां कर्माणि च प्रतिपादितानि-

**"हस्तौ पादौ गुदोपस्थं वागिन्द्रियमथापि च।**

**कर्मेन्द्रियाणि पञ्चैव पादौ गमनकर्मणि॥**

---

19. सुश्रुत.शारीर 1/5.
20. चरक.शारीर.1/24
21. चरक.शारीर.1/25
22. चरक.शारीर.1/23
23. वेदान्तसार: 13
24. श्रोत्रादीनां पञ्चानां क्रमेण दिग्वातार्कवरूणाश्विनोऽधिष्ठातृदेवता: - वे.परि.विषय.पृ.सं 337
25. वेदान्तसार: 13
26. तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवता: - वे.परि.विषय.पृ.सं 338
27. साङ्ख्य.का.28
28. गौडपाद.(साङ्ख्य.का) 26
29. चरक.सूत्र.8/11

**पायूपस्थं विसर्गार्थं हस्तौ ग्रहणधारणे।**

**जिह्वा वागिन्द्रियं वाक् च सत्या ज्योतिस्तमोऽनृता।।** "[30] इति।

तेषाम् इन्द्रियाणाम् अधिष्ठात्र्यः देवताः सुश्रुते वर्ण्यन्ते – "दिशः श्रोत्रस्य, त्वचो वायुः, सूर्यश्चक्षुषः, रसनस्यापः, पृथिवी घ्राणस्य, वाचोऽग्निः, हस्तयोरिन्द्रः, पादयोर्विष्णुः, पायोर्मित्रः, प्रजापतिरुपस्थस्य"[31] इति। अत्र घ्राणस्य पायोश्च देवतयोः विषये अद्वैत-योगयोः मध्ये मतभेदः, ज्ञानेन्द्रिय-कर्मेन्द्रिययोः विषये समानवादः त्रिष्वपि शास्त्रेषु अवलोकितुं शक्यते।

**1.5. प्रत्यक्षादिज्ञाने इन्द्रियाणां निमित्तकारणत्वम्-** जीवस्य प्रामणजन्यज्ञानेषु इन्द्रियाणि साधनानि भवन्ति। तत्र विषयेन्द्रियसन्निकर्षोत्तरम् अन्तःकरणमिन्द्रियेभ्यः तत्तद्वस्तुदेशं गत्वा तद्वस्त्वाकारेण परिणमते। एवमुपाध्योः एकदेशस्थत्वे सति एककालिकत्वस्य अभेदप्रयोजकत्वात् तद्वस्तूपहितचैतन्यस्य अन्तःकरणोपहितचैतन्यस्य च अभेदात् विषयप्रत्यक्षता भवति इति वेदान्तप्रक्रिया। एवमनुमानादिष्वपि इन्द्रियाणि उपकारकाणि भवन्ति तृतीये अध्याये दर्शितम्। इत्थं मनःप्रेरितानि चक्षुरादीनि इन्द्रियाणि विषयज्ञानाय सहकारीणि भवन्ति इति विज्ञेयम्। उक्तञ्च – "इन्द्रियमनोभ्यां वस्तुनः विज्ञानम्"[32], "इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान्"[33] इति।

योगिनः अपि प्रत्यक्षादिज्ञाने इन्द्रियाणां निमित्ततां प्रतिपादयन्ति। उक्तञ्च व्यासभाष्ये – "इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् सामान्यविशेषात्मनो अर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्"[34] इति।

आयुर्वेदिनः अपि इन्द्रियाणि जीवस्य बाह्यप्रपञ्चज्ञानार्थं प्रधानानि कारणानि भवन्ति। किन्तु न इन्द्रियाणि स्वयं विषयग्रहणे रतानि भवन्ति, अपि तु मनःपुरस्सराणि एव विषयान् गृह्णन्ते इति तेऽपि अङ्गीकुर्वन्ति। उक्तञ्च – "मनःपुरस्सराणि इन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति"[35], "इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते"[36] इति। तत्र चक्षुर्बुध्यादौ आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियमर्थेन इति क्रमशः आत्मादीनां संयोगः भवति इति प्रक्रिया आयुर्वेदसम्मता। श्रोत्रबुद्धौ तु श्रोत-शब्दयोः इन्द्रियार्थयोः न संयोगः, किन्तु समवायः समन्धः इति अभ्युपेयते। इत्थं प्रत्यक्षादिषु ज्ञानेषु इन्द्रियाणि सहकारीणि इति आयुर्वेदिनः अपि अभ्युपगच्छन्ति।

**1.6. अतीन्द्रियाणाम् इन्द्रियाणाम् अधिष्ठानस्थानानि**– लोके नयनगोलक-कर्णादिषु एव इन्द्रियाणि इति इति व्यवहारः दृश्यते। किन्तु वस्तुतः तानि न इन्द्रियाणि। किन्तु तानि चक्षुरादीनाम् इन्द्रियाणां स्थानमात्राणि इति विज्ञेयम्। अतः चक्षुरिन्द्रियस्य द्वे नेत्रे स्थाने। श्रोत्रेन्द्रियं कर्णौ अधितिष्ठति। घ्राणेन्द्रियं नासिकयोः तिष्ठति। रसनेन्दियस्य जिह्वा अधिष्ठानम्। स्पर्शेन्द्रियं त्वचमधितिष्ठति। "तच्चेदं शरीराख्यं पुरम् एकादशद्वारमेकादशद्वाराणि अस्य सप्त शीर्षण्यानि नाभ्या सह अर्वाञ्चि त्रीणि शिरस्येकं तैरेकादशद्वारं पुरम्"[37] इति शरीरस्य अवयवानि निरूप्य शीर्षण्यानां द्वाराणाम् इन्द्रियाणि, मूर्ध्नः प्राणः, नाभेः समानः, अधोद्वाराणाम् अपानः द्वारपालानि[38] इति इन्द्रियाणां द्वारपालत्वेन वर्णनं क्रियते। अतः शरीरावयवत्वेन प्रत्यक्षाणि स्थूलानि नेत्रादीनि इन्द्रियाणि न इत्यवगम्यते। अपि च इन्द्रियाणां सूक्ष्मशरीरे सद्भावप्रतिपादनात्, तेषां सूक्ष्मत्वमवगन्तव्यम्। अतः एव इन्द्रियाणि न प्रत्यक्षाणि किन्तु, अनुमानागम्यानि इति आचार्याः वदन्ति। उक्तञ्च – "इन्द्रियं विषयग्रहणकार्यानुमेयं करणसामर्थ्यम्"[39] इति। "इन्द्रियमतीन्द्रियम्, इन्द्रियत्वात्,

---

30. चरक.शारीर.1/25,26
31. सुश्रुत.शारीर.1/10
32. केन.भा.1/3
33. कठ.उ.1/3/4
34. व्यासभाष्यम् (यो.सू.) 1/7
35. चरक.सूत्र.8/7
36. चरक.शारीर.1/22
37. कठ.भा.2/2/1
38. गोपालयतीन्द्रटीका (कठ.भा.) 2/2/1
39. छां.भा.3/6/1

चक्षुरिन्द्रियवत्" इति न्यायानुसारमेव "ननु अन्तःकरणस्य इन्द्रियतया अतीन्द्रियत्वात् कथमहमिति प्रत्यक्षविषयता"[40] इति परिभाषायाम् अन्तःकरणस्य इन्द्रियत्वे प्रश्नः उत्थापितः। अतः इन्द्रियाणामतीन्द्रियत्वेन, नयनगोलकादीनि प्रत्यक्षाणि न इन्द्रियाणि, किन्तु इन्द्रियस्थानमात्राणि इति अद्वैतिनः।

आयुर्वेदशास्त्रे अपि नेत्रादीनि स्थूलानि इन्द्रियाणाम् अधिष्ठानस्थानमात्राणि इति अङ्गीकृतानि। उक्तञ्च – "पञ्चेन्द्रिय-अधिष्ठानानि – अक्षिणी कर्णौ नासिके जिह्वा त्वक् चेति"[41] इति। किञ्च इन्द्रियाणाम् अतीन्द्रियत्वेन अनुमानमात्रगम्यत्वं प्रतिपाद्यते। उक्तञ्च –

**"अनुमानात् परीक्षेत दर्शनादीनि तत्त्वतः।**

**अद्धा हि विदितं ज्ञानमिन्द्रियाणामतीन्द्रित्वम्॥** "[42] इति।

तस्मात् नेत्रादीनि इन्द्रियास्थानमात्राणि, इन्द्रियाणि तु अतीन्द्रियाणि कार्येण अनुमातव्यानि इति सिद्धम्।

**1.7. इन्द्रियदोषाः तत्परिणामाः परिहाराश्च-** इन्द्रियगताः दोषाः भ्रमज्ञाने निमित्तानि भवन्ति इति वेदान्तेषु प्रतिपाद्यते। तद्यथा – "काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते"[43] इति। काचकामलादयः चक्षुरादीन्द्रियगत-दर्शनादिशक्तीनां प्रतिबन्धकाः सन्तः दोषाः भवन्ति। उक्तञ्च – "प्रकाशजनक-चक्षुरादिगत-शक्तिप्रतिबन्धक-काचादिषु दोष-शब्दप्रयोगो दृश्यते"[44], "वस्तुप्रकाश-प्रतिबन्धकः तिमिर-काचादि-दोषाः"[45] इति।

योगिनः एकादशेन्द्रियदोषान् निरूपयन्ति। उक्तञ्च – "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा"[46] इति। विवृतञ्च गौडपादभाष्ये – "तत्रैकादशेन्द्रितबधाः – बाधिर्यम् अन्धता प्रसुप्तिः उपजिह्विका घ्राणपाको मूकता कुणित्वं खञ्जा गुदावर्तः क्लेब्यमुन्मादः" इति।

इन्द्रियदोषेभ्यः कारणं वातपित्तकफानाम् इन्द्रियस्थानेषु प्रवेशः इति आयुर्वेदिनः। वातादयः यदा इन्द्रियस्थानानि प्रविशन्ति तदा इन्द्रियाणि स्वमर्थं गृहीतुमप्रवृतानि विषमरीत्या वा प्रवृत्तानि भवन्ति। उक्तञ्च – "इन्द्रियाणामप्रवृत्तिरयथाप्रवृत्तिर्वेन्द्रियायतनदोषाः"[47] इति। आयुर्वेदे प्रतिपादिताः केचन इन्द्रियरोगाः तेषां कारणानि च निरूपन्ते।

**कर्णरोगाः** कर्णशूलपदेन अभिधीयन्ते। कर्णस्रोते वायुस्थितिः, जलक्रीडा, कर्णकण्डूयनम्, कर्णं प्रति विविधैः शस्त्रैः आघातः, इत्यादयः कर्णरोगाय कारणानि भवन्ति। कर्णस्रोते विकृतवायौ स्थिते रोगी भेरी-मृदङ्ग-शङ्खादिरवं श्रुणोति, स कर्णनादः उच्यते। यदा शुद्धः श्लेष्मान्वितो वा वायुः कर्णस्रोतमावृणोति तदा बाधिर्यमुपजायते। एवमेव कर्णक्ष्वेडः कर्णसंस्रावः, कर्णकण्डू, कर्णप्रतिनाहं, कृमिकर्णकः, कर्णविदध्रिः, कर्णपाकः, पूतिकर्णः, कर्णशोथः, कर्णार्बुदः, कर्णार्शः, परिपोटकः, उत्पातः, उन्मन्थकः इत्यादयः कर्णरोगाः माधवनिदाने सुश्रुते चरके च प्रतिपाद्यन्ते[48]।

**नासिकायां** वातपित्तकफानां विकारेण नाना नासारोगाः आविर्भवन्ति। यथा वातशोषितायां कफपूरितायां च नासिकायां गन्धज्ञानं न भवति,

---

[40]. वे.परि.प्रत्यक्ष. पृ 39

[41]. चरक.सूत्र.8/10

[42]. चरक.इन्द्रिय.4/4

[43]. वे.परि.प्रत्यक्ष.पृ 105

[44]. वक्तव्यकाशिका

[45]. आनन्दगिरी (गी.भा.) 13/2

[46]. साङ्ख्य.का.49

[47]. सुश्रुत.सूत्र.25/18

[48]. माधव.कर्ण.1-20

स अपीनसरोगः उच्यते[49]। एवमेव पूतिनस्यं, नासापाकः, पूयरक्तं, क्षवथुः, आगन्तुजक्षवथुः, भ्रंशथुः, दीप्तरोगः, प्रतीनाहः, नासास्रावः, नासाशोषः, पीनसं, प्रतिश्यायः, इत्यादयः रोगाः आयुर्वेदेषु[50] श्रूयन्ते।

**चक्षुषः** रक्षा मानवेण अत्यन्तं प्रयत्नपूर्वकं करणियम्। समस्तसाधनवतः अपि चक्षुर्विहीनस्य संसारः निष्प्रयोजनः इव भवति। उक्तञ्च –

**"चक्षुरक्षायां सर्वकालं मनुष्यैर्यत्नः कर्तव्यो जीविते यावदिच्छा।**

**व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां पुंसामन्धानां विद्यमानेऽपि वित्ते।।"**[51] इति।

उष्णप्रदेशात् झटिति शीतप्रदेशप्रवेशः तद्विपर्ययो वा, दूरस्थवस्तुदर्शनं, स्वापविपर्ययः, नेत्रे प्रति स्वेद-धूलि-धूमानां सम्पर्कः, वमनविघातः अतियोगश्च, रात्रौ द्रवबहुलाहारसेवनं, मल-मूत्र-वायोः बलादवरोधः, दीर्धकालिक-क्रोध-शोक-रोदनानि, शिरोभिघातः, मद्यपानम्, ऋतुविपर्ययेण जीवनं, मानसिक-शारीरिकक्लेशे, अतिमैथुनं, बाष्पस्य अवरोधः, सूक्ष्मनिरीक्षणम् इत्यादिभिः कारणैः प्रकुपिताः वातादयः नेत्ररोगान् प्रति कारणानि भवन्ति[52]। सुश्रुते चक्षुषः भयङ्कररोगत्वेन नव सन्ध्याश्रयाः रोगाः, एकविंशतिः वर्त्मजाः रोगाः, एकादश शुक्लभागीयाः रोगाः, चत्वारः कृष्णभागीयाः दोषाः, सप्तदश सर्वभागव्याप्ताः रोगाः, द्वादश दृष्टिगताः रोगाः, द्वौ बाह्यजरोगौ इति आहत्य अष्टसप्ततिः रोगाः उपदिश्यन्ते[53]। ते च यथा – वातपित्तकफरक्त-भेदेन अभिष्यन्दरोगाः, अधिमन्थः, पक्कदोषः, हताधिमन्थः, शुष्काक्षि, अन्यतोवातः, अम्लाध्युषितं, सिरोत्पातः, सिराप्रहर्षः, सर्वणशुक्लम्, अव्रणशुक्लम्, अक्षिपाकात्ययम्, अजकाजातं, नेत्रपटलगताः तिमिरदोषाः, परिम्लायी काचः, वात-पित्त-कफभेदेन विदग्धरोगः, धूमदर्शिरोगः, ह्रस्वजाड्यम्, नकुलान्ध्यम्, गम्भीरिका, प्रस्थार्य-शुक्ल-रक्त-अधिमांस-स्नाव्यभेदेन चर्मरोगाः, शुक्तिका, अर्जुनः, पिष्टकं, सिराजालं, सिराजपिण्डका, बालासग्रथितं, पूयालसलः, उपनाहः, चतुर्विधस्रावाः, पर्वणी, अलजी, क्रिमिग्रन्थि, उत्सङ्गिनी, कुम्भिका, पोथुकी, वर्त्मशर्करा, अर्शोवर्त्म, शुष्कार्षः, अञ्जनरोगः, बहुल-बन्धक-क्लिष्ट-कर्दम-श्याव-प्रक्लिन्न-अक्लिष्टन्न-वातहत-विस-भेदेन वर्त्मरोगाः, अर्बुदं, निमेषः, शोणितार्शः, लगणं, कुञ्जनं, पक्ष्मकोपः, पक्ष्मशातमित्यादयः रोगाः नेत्रस्य वर्ण्यन्ते[54]। परिभाषादिषु उल्लिखितः काचरोगः नेत्रस्य तिमिरदोषेषु अन्यतमः। नेत्रे चत्वारि पटलानि अङ्गीकृतानि। तेषु त्रितीयपटलगते दृष्टिदोषे तिमिराख्ये यदा रागः उत्पद्यते, स काचः उच्यते[55]। तृतीयपटलगते तिमिरदोषे रोगी उपरिस्थितं वस्तु पश्यति, नाधःस्थितम्। किञ्च महान्त्यपि वस्तूनि वस्त्राच्छादितानि पश्यति, पुरुषं कर्ण-नासा-अक्षिहीनं विकृतं पश्यति[56]। स एव तिमिररोगः सरागः काचरोगः उपदिष्टः। तत्र काचरोगे षड्विधाः रागाः भवन्ति[57]। वातजः काचः नेत्रे अरुणरागं, पित्तजः म्लायिं[58] नीलं च वर्णं, कफजः श्वेतवर्णं, रक्तजः रक्तवर्णं, सर्वदोषजः विचित्रवर्णमुत्पादयति[59]। काचस्य एव विशेषः परिम्लायिकाचः अथवा कामलः उच्यते। तदा रक्त-पित्तयोः अत्यन्तं विकारेण रोगी सर्वत्र पीतमेव पश्यति। इत्येवं नेत्ररोगाः नाना आयुर्वेदेषु वर्णिताः।

---

49. माधव.नासारोग.1, चरक.चिकित्सा.26
50. माधव.नासारोग.1-28, सु.उत्तर.22,26, चरक.चिकित्सा.26
51. अष्टाङ्ग.उत्तर.13
52. माधव.नेत्ररोग.1-3
53. सुश्रुत.उत्तर.3/1,2
54. माधव.नेत्ररोग.4-99, सुश्रुत.उत्तर.अ 3,4,5,6,7,16
55. स एव लिङ्गनाशस्तु नीलिका काचसंज्ञितः- सुश्रुत.उत्तर.7
56. माधव.नेत्ररोग.33,34
57. वक्ष्यामि षड्विधैः रागैः लिङ्गनाशमतःपरम्- माधव.नेत्ररोग.48
58. पीत-नीलमिश्रणम्
59. माधव.नेत्ररोग.49

सुश्रुते पञ्चप्रकाराः **जिह्वारोगाः** उपदिश्यन्ते। ते च वात-पित्त-कफजाः त्रयः दोषाः, अलासः, उपजिह्विका च। उक्तञ्च - "कण्टकास्त्रिविधस्त्रिभिर्दोषैः, अलास, उपजिह्विका चेति"[60] इति। वायुप्रकोपेण जिह्वा स्फुटिता रसज्ञानरहिता च भवति। पित्तप्रकोपेण जिह्वा कदाचित् पीता दाहयुक्ता रक्तवर्णीयकण्टकैश्च युक्ता भवति। कफविकृत्या तु जिह्वा गुर्वी पीना दाहयुक्ता च भवति। किञ्च कफदोषेन जिह्वायां कण्टकसमानं मांसाः अङ्कुरिताः भवन्ति। कफरक्तयोः विकृत्या जिह्वामूले उत्पद्यमानः शोथः अलासः उच्यते। तेन जिह्वामूले तीव्रोष्णतायाः अनुभवो भवति। तयोरेव कफरक्तयोः विकारेण जिह्वाग्रे उत्पद्यमानः शोथः प्रसेक-कण्डूय-परिदाहयुक्तः उपजिह्विका उच्यते।

**चर्मरोगेषु** कुष्ठस्य प्राधान्येन वर्णनं चिकित्सा च आयुर्वेदग्रन्थेषु उपलभ्यते। मिथ्याहारविहारादिभिः हेतुभिः उत्पद्यमानः चर्मरोगविशेषः कुष्ठमुच्यते। तच्च च क्रमेण शरीरस्य रक्तमांसादीन् धातून् दूषयति। उक्तञ्च- "मिथ्याहाराचारस्य...एवं सम्पुत्पन्नस्त्वचि दोषः तत्र तत्र च परिवृद्धिं प्राप्य अप्रीतिक्रियमाणोऽभ्यन्तरं प्रतिपद्य धातूनभिदूषयति"[61] इति। कुष्ठस्य महाकुष्ठं क्षुद्रकुष्ठमिति भेदद्वयम्। तेषु महाकुष्ठस्य सप्तभेदाः क्षुद्रकुष्ठस्य एकादशभेदाः, इत्येवमाहत्य अष्टादशकुष्ठानि चिकित्स्यानि इत्युच्यते सुश्रुते[62] इति। अयञ्चचर्मरोगविशेषः त्रयाणामपि दोषाणां विकारेण चर्मसु समुद्भवति। उक्तञ्च - "सर्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि"[63] इति। पाण्डुरोगोऽपि चर्मरोगेषु अन्यतमः आयुर्वेदग्रन्थेषु श्रूयते। अयमपि वात-पित्त-कफ-सन्निपात-मृद्भक्षणजन्यः इति पञ्चविधः[64]।

**वागिन्द्रियस्य** मूकता, गद्गदिका इत्यादयः दोषाः। कुणित्वादयः **पाणीन्द्रियस्य** दोषाः। पङ्गुत्वादयः **पादेन्द्रियस्य** दोषाः। गर्भे वातप्रकोपेन जन्मना एव कुणित्वपङ्गुत्वे भवतः। उक्तञ्च - "गर्भावातप्रकोपेन दोहदे चावमानिते। भवेत् कुब्जः कुणिः पङ्गुः"[65] इति। असात्म्याहारसेवनने विकृताः वातादयः मलबद्धतादीन् **गुदेन्द्रियस्य** रोगान् जनयन्तः, तस्य विसर्जनकार्ये बाधकाः भवन्ति। वातिक-पैत्तिक-श्लैष्मिक-सन्निपातक-शोकज-आमदोषजभेदेन अतिसारः गुदेन्द्रियस्य प्रमुखः रोगविशेषः[66]। विदध्री इति रोगविशेषः मिथ्याहारविहारनिमित्तं वातादिप्रकोपेण रक्तमांसादीन् धातून् दूषयित्वा अस्थिनः अन्तः क्रमेण भीकरं शोथं जनयति। सा च विदध्री गुदस्य अन्तः विवृद्धः गुदद्वारात् मलं वातं च निरुणद्धि[67]। ग्रहणी अपि गुदरोगेषु अन्यतमः[68]।

**उपस्थेन्द्रियदोषाः** अनेके आयुर्वेदग्रन्थेषु उपदिष्टाः। तेषु शुक्रदोषः प्रधानः। फेनयुक्तः, तनुः, अत्यन्तं रुक्षः, अन्यैः धातुभिरुपसृष्टः, अवसादयुक्तः, पूतिगन्धः, पिच्छलः विवर्णश्च शुक्रः दुष्टः उच्यते[69]। शुक्रदोषे अतिव्यायामः, अतिमैथुनम्, असात्म्यपदार्थसेवनं, मैथुनस्य पूर्णत्यागः, अतिचिन्ताशोके, भय-क्रोध-अविश्वासाः, वार्धक्यं, शस्त्राभिघातादयः वात-पित्त-कफ-रक्तेषु विकृतीनुत्पाद्य शुक्रदोषं जनयन्ति[70]। सुश्रुते - वातदूषितः, पित्तविकृतः, कफव्याप्तः, रक्तयुतः, मृतस्य मलस्य मूत्रस्य च दुर्वासनायुक्तः, मूत्रयुक्तः, ग्रन्थियुतः, क्षीणः[71] इति शुक्रदोषस्य भेदाः

---

60. सुश्रुत.निदान.16/38
61. सुश्रुत.निदान.5/3
62. सुश्रुत.निदान.5/5
63. सुश्रुत.निदान.5/6
64. चरक.सूत्र.19/ 3
65. सुश्रुत.उत्तर.10
66. सुश्रुत.उत्तर.40/7,8
67. चरक.निदान.9/21
68. सुश्रुत.उत्तर.40/167
69. माधव.शुक्रदोष.8
70. माधव.शुक्रदोष.3-7
71. सूश्रुत.शारीर.2/3

दर्शिताः। शुक्रविकारेण पुरुषे नपुंसकता, मैथुनोत्साहाभावः, दुष्टस्य अल्पायुषः रोगिणः जीवस्य उत्पादकत्वं, गर्भपातकारणत्वं च आपद्यते[72]। उपस्थेन्द्रियस्य दोषेषु क्लैब्यमन्यतमम्। क्लैब्यमथवा नपुंसकता बीजोपघातः ध्वजोपघातः जरा शुक्रक्षयः इति चतुर्भिः कारणैः प्राधान्येन उपजायते[73], अन्येऽपि वातादीनां विकाराः मानसो दोषाश्च क्लैब्ये कारणानि भवन्ति। क्लीबः सम्भोगासक्तिहीनः, स्त्रीश्वासमात्रपीडितः, स्त्रीसान्निध्यमात्रेण स्विन्नतनुः, सङ्कल्पशक्तिरहितः, निष्फलचेष्टः शिथिललिङ्गबीजवान् च भवति। मातापित्रोः बीजदोषात् पापकर्मानुष्ठानदोषाच्च गर्भजक्लैब्यम्, आसेक्यं, सौगन्धिकं, कुम्भीकम्, ईर्ष्यकं, षण्डलक्षणं, द्विरेतः, पवेनेन्द्रियता, संस्कारवाहः, मन्दवेगः, अल्पहर्षः, वक्री, ईर्ष्यारतिः, वातिकषण्डः इति क्लैब्यस्य भेदाः सन्ति[74]। पुरुषस्य मिथ्याहार–आचारनिमित्ततया मानसक्लैब्यं, पित्तजक्लैब्यं, शुक्रक्षयजं, मेढ्ररोगजं, उपघातजं, शुक्रस्तम्भजं, सहजमिति क्लैब्यभेदाः श्रूयन्ते[75]। उपस्थेन्द्रियं प्रति औषधविशेषाणां मिथ्याप्रयोगेण अन्येऽपि सर्षपिका, अष्ठीलिकादयः अष्टादशरोगाः उपस्थेन्द्रियसम्बद्धाः सुश्रुते वर्ण्यन्ते[76]। पूर्वं प्रतिपादितः विदध्रीरोगः उपस्थायां वर्धितः मूत्रत्यागे आनन्दलाभे च कठिनतां जनयति[77]। हस्तमैथुनादि–निन्दिताभ्यासेन शुक्रमेहः इति रोगो जायते[78]। तेन स्वप्नस्खलनं, मलमूत्रयोः अवरोधः, स्त्रीणामवलोकन–आलोचनमात्रेण शुक्रस्खलनं, अजीर्णता, दर्शनशक्तिह्रासः, अतिसारादयः रोगाः अपि प्रादुर्भवन्ति। भृशोष्णवातरोगः स्त्रीपुरुषयोः योन्युपस्थयोः दुर्गन्धं, कीटाणून्, दाहं, कण्डूयं, मूत्रविसर्जने अतीवपीडां च जनयति[79]। पुरुषाणाम् उपस्थः इव स्त्रीणाम् योनिषु योनिकण्डूयनं, योन्याक्षेपः इत्यादयः रोगाः भवन्ति। सन्तानोत्पत्तौ बाधकाः रक्तमाद्री, षष्ठी, अङ्कुर, जलकुमारः इत्यादयः अपि रोगाः स्त्रीणामुपस्थेन्द्रियं बाधन्ते[80]।

आयुर्वेदे एते सर्वेऽपि दोषाः सारल्येन त्रिधा विभज्यन्ते। ते च इन्द्रियाणाम् अतियोगः अयोगः मिथ्यायोगश्च। अतियोगो नाम रूपाद्यतिदर्शनम्। अयोगः हीनमात्ररूपादिदर्शनं सर्वथा अदर्शनं वा। मिथ्यायोगः विकृतबीभत्सरूपादिदर्शनम्। एतैः दोषैः इन्द्रियाणि विषयज्ञाने उपघातं कुर्वन्ति। विषय–ज्ञाने उपघातात् अन्तःकरणमपि उद्विग्नत्व–दैन्यतादिलक्षणं विकारमापद्यते। उक्तञ्च – “तदर्थ–अतियोगात् अयोगात् मिथ्यायोगात् समनस्कमिन्द्रियं विकृतिमापद्यमानं यथास्वं बुद्ध्युपघाताय सम्पद्यते”[81] इति। इन्द्रियाणाम् अतियोगादिदोषाय पुनरपि वातपित्तकफदोषाः एव कारणानि भवन्ति। इन्द्रियाधिष्ठानेषु चक्षुरादिषु वातादयः दोषाः गत्वा कुपिताः भवन्ति तर्हि इन्द्रियाणाम् अतियोगादिविकाराः सम्भवन्ति। तेनैव इन्द्रियविकलता च सम्भवति।

प्राक् प्रतिपादितानां रोगाणाम् उपशान्तये औषधविशेषास्तु आयुर्वेदग्रन्थेषु उपदिष्टाः अवश्यं स्वीकार्याः। तेन सह इन्द्रियाणां समयोगता अपि प्रयत्नेन सम्पादनीया। अर्थात् इन्द्रियाणां स्वाभाविकेन सामर्थ्येन विषयग्रहणं करणीयम्। तेन च सम्यक् विषयज्ञानसम्पादनेन मनसः स्वास्थ्यमपि संरक्षितं भवति। समनस्कानामिन्द्रियाणां समयोगतापूर्वकं स्वास्थ्यसंरक्षणाय सद्वृत्तानि आयुर्वेदशास्त्रे अनेकानि प्रतिपादितानि। इन्द्रियार्थयोः समयोगेन यत् ज्ञानमुत्पद्यते, तेन हिताहितं सम्यग्विचार्य अहितकर्मणां परित्यागपूर्वकं शास्त्रविहितानां हितकर्मणामनुष्ठानं विधेयम्। तेन च अनुत्पन्नानां विकाराणां नाशः सम्भवति। एषां सद्वृत्ताणामनुष्ठानेन आरोग्यम् इन्द्रियजयमुभयं सिद्ध्यति[82]। उक्तञ्च – “तत्रेन्द्रियाणां समनस्कानामनुपतप्तानाम् अनुपतापाय प्रकृतिभावे प्रयतितव्यमेभिर्हेतुभिः। तद्यथा – “सात्म्येन्द्रियार्थसंयोगेन बुद्ध्या सम्यगवेक्ष्यावेक्ष्य कर्मणां सम्यक्प्रतिपादनेन

72. चरक.सूत्र.28/18
73. माधव.क्लैब्य.1
74. माधव.क्लैब्य.5–49
75. माधव.क्लैब्य.50–57
76. सुश्रुत.निदान.14/3
77. चरक.निदान.9/21
78. माधव.शुक्रमेह.1
79. माधव.भृशोष्णवात.1
80. माधव.योनि.बाधक.1–9
81. चरक.सूत्र.8/11
82. चरक.सूत्र.8/18

देशकालात्मगुणविपरीतोपासनेन चेति"[83] इति। सद्वृत्तानाम् अनुष्ठानेन दीर्घायुष्यं, यशः, स्नेहः, पुण्यलोकप्राप्तिरित्यादीनि अन्यानि अपि फलानि आयुर्वेदे प्रतिपादितानि। उक्तञ्च –

**"स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।**

**स समाः शतमव्याधिरायुषा न वियुज्यते॥"**

**"नृलोकमापूरयेत् यशसा साधुसंमतः।**

**धर्मार्थाऽति भूतानां बन्धुतामुपगच्छति॥"**

**परान् सुकृतिनो लोकान् पुण्यकर्मा प्रपद्यते।**

**तस्माद् वृत्तमनुष्ठेयमिदं सर्वेण सर्वदा॥"**[84] इति।

तत्र प्रतिपादितानि कानिचन सद्वृत्तानि उल्लिख्यन्ते – देव-गो-ब्राह्मण-गुरु-वृद्ध-सिद्ध-आचार्यान् पूजयेत्। अग्निमुपासीत। प्रशस्तान् ओषधीन् वर्धयेत्। सन्ध्यावन्दनमनुतिष्ठेत्। सदा गुदादिमलमार्गाणां पादयोश्च क्षालनं कुर्यात्। पक्षे मासे वा त्रिवारं केश-स्मश्रु-लोम-नखानां कर्तनं कुर्यात्। अनुपहतं सुन्दरं च वस्त्रं धरेत्। नित्यं केशप्रसादनं करणीयम्। मस्तके, नासिकायां, कर्णयोः, पादयोः च नित्यं तैलमार्जनं कार्यम्। ऋतुचर्या-प्रतिपादितं धूमपानं करणीयम्। पूर्वाभिभाषी, स्मितवदनः, दयालुः, याज्ञिकः, दाता, चतुष्पदानां नमस्कर्ता, प्राणिभ्यः आहारप्रदाता च भवेत्। अतिथिपूजनं पितृभ्यः पिण्डप्रदानं च करणीयम्। सकाले मधुर-हित-मित-वचनानि कथयेत्। जितेन्द्रियः धर्मात्मा च भवेत्। अनसूयकः, निश्चिन्तः, निर्भीतः, लज्जायुक्तः, बुद्धिमान्, उत्साही, चतुरः, क्षमायुक्तः, विनयवतां बुद्धिमतां विद्यावताम् कुलीनानां वृद्धानां सिद्धानाम् आचार्याणां च उपासिता च भवेत्। छत्रधारी, दण्डधारी, मौली, पादरक्षधारी च भवेत्। सम्यगवलोक्य मार्गे चलेत्। मङ्गलकार्येषु तत्परः भवेत्। सः दुर्वासनायुक्तम्, अस्थि-कण्टक-अपवित्रकेश-तुष-उत्कर-भस्म-कपालयुक्तं स्नानयोग्यं बलिप्रदानयोग्यं च स्थानं परित्यजेत्। अतिव्यायामवर्जी सर्वप्राणिषु बन्धुभूतः, क्रुद्धानां सामाधाता, भीतानाम् आश्वासयिता, परोपकारी, सत्यसन्धः, शान्तमनाः, सहिष्णुः, सर्वत्र शुभदर्शी, रागद्वेषहेतूनां च हन्ता च भवेत्।

इन्द्रियरोगेभ्यः प्रायेण असात्माहारसेवनं, मिथ्याचाराश्च कारणानि भवन्ति इति अवलोकितुं शक्यते। अतः वातादिदोषोपशमनपूर्वकम् इन्द्रियरोगोपशमाय औषधविशेषसेवनेन सह स्वात्म्याहारसेवनं, सदाचाराः, सद्वृत्तानुष्ठानपूर्वकमिन्द्रियाणां समतासम्पादनञ्च करणीयम्।

**1.7. इन्द्रियारिष्टत्वप्रतिपादनम्**– आयुर्वेदे वैद्यः प्राणिनाम् इन्द्रियपरीक्षणेन आयुषः प्रमाणं वक्तुमर्हति। अत्रः नेत्रादीनाम् इन्द्रियाणां परीक्षणं वैद्येन कार्यमिति उच्यते। स्वस्थानि अपि इन्द्रियाणि विषयान् वैपरीत्येन यदि गृह्णन्ति, तर्हि तज्जीवस्य मरणसूचकं भवति। उक्तञ्च –

**"स्वस्थेभ्यो विकृतं यस्य ज्ञानमिन्द्रियसंश्रयम्।**

**आलक्ष्येतानिमित्तेन लक्षणं मरणस्य तत्॥"**[85] इति।

इदं तु इन्द्रियाणाम् अरिष्टत्वसामान्यलक्षणम्। एवमेव प्रत्येकमिन्द्रियस्य अरिष्टत्वमपि आयुर्वेदशास्त्रे प्रतिपाद्यते। अरिष्टत्वनिरूपणकाले यत्र मरणसूचकमिदमिति केवलं प्रतिपाद्यते, मरणकालः नोच्यते, तत्र एकवर्षाभ्यन्तरे तादृश-अरिष्टविशेषदर्शनेन रोगी म्रियते इति अवगन्तव्यम्। कुत्रचित् स्पष्टरूपेण अरिष्टविशेषदर्शनात् एतावति काले एव मरणं प्राप्नोति इति निरूपणं क्रियते।

**नेत्रारिष्टविशेषाः** – यदि रोगी आकाशं घनीभूतमिव, पृथिवीं शून्यमिव पश्यति तर्हि तत्तस्य मरणसूचकं भवति। यस्य रोगिणः अमूर्तो वायुः मूर्तिमानिव इव दृश्यते, प्राकाशयुक्तः अग्निः दृष्टिपथं च नायाति तस्यायुः क्षीणमनुमीयते। प्रवहति स्थिते वा स्वच्छजले यदि जालं प्रसारितमिव दृश्यते तर्हि तत् रोगिणः मरणसूचकं भवति। यदि रोगी जागरिते एव भूतप्रेतराक्षसान् भायावहान् च दृश्यान् पश्यति, तर्हि सः बहुकालं न जीवति। यदि रोगी अग्निं नीलं प्रभाहीनं कृष्णवर्णीयं श्वेतवर्णीयं वा पश्यति तर्हि सप्तमे दिने एव मरणं प्राप्नोति। रोगी आकाशे मेघाभावे अपि मरीचीन् मेघान्

83. चरक.सूत्र.8/17

84. चरक.सूत्र.8/31-33

85. चरक.इन्द्रिय.4/5

विद्युतं वा यदि पश्यति तर्हि आशु मरणं प्राप्नोति। रोगी कृष्णवस्त्राच्छादितं मृत्-पात्रमिव सूर्यं चन्द्रं वा यदि पश्यति, सः न बहुकालं जीवति। यदि सूर्यं प्रभाहीनं चन्द्रं कलङ्करहितं रोगी पश्यति स शीघ्रं म्रियते। स्वस्थो रोगी वा यदि अमावास्यां पौर्णम्यां वा विनापि सूर्याचन्द्रमसोः अपि तयोर्ग्रहणं पश्यति, सः मरणं ऋच्छति। अपि च रोगी रात्रौ सूर्यं, दिने प्रकाशमानं चन्द्रं, विना अग्निं धूमं, रात्रौ प्रभाहीनं अग्निं वा यदि पश्यति सः मृत्युमाप्नोति। यः पुरुषः प्रभाहीने वस्तुनि प्रभां तद्विपरीतं वा पश्यति, यश्च पदार्थानां स्वाभाविकरूपातिरिक्तं रूपम् अवलोकते सः म्रियते। सन्निहितमरणः पुरुषः विकृतानि विवर्णानि विपरीतसंख्यकानि च रूपाणि पश्यति। किञ्च अदृश्यं वस्तु यः पश्यति दृश्यं च न पश्यति स शीघ्रमेव म्रियते। इत्येतानि नेत्रविषयकानि अरिष्टानि। उक्तञ्च -

**"घनीभूतमिवाकाशमाकाशमिव मेदिनीम्।**

**विगीतमुभयं ह्येतत् पश्यन् मरणमृच्छति॥"**

**यस्य दर्शनमायाति मारुतोऽम्बरगोचरः।**

**अग्निर्नायाति चादीप्तस्तस्यायुः क्षयमादिशेत्॥"**

**जले सुविमले जालमजालावतते नरः।**

**स्थिते गच्छति वा दृष्ट्वा जीवितात् परिमुच्यते॥"**

**जाग्रत्पश्यति यः प्रेतान् रक्षांसि विविधानि च।**

**अन्यद्वाप्यद्भुतं किञ्चिन्न स जीवितुमर्हति॥"**

**योऽग्निं प्रकृतिवर्णस्थं नीलं पश्यति निष्प्रभम्।**

**कृष्णं वा यदि वा शुक्लं निशां व्रजति सप्तमीम्॥"**

**मरीचीनसतो मेघान्मेघान्वा असतोऽम्बरे।**

**विद्युतो वा विना मेघैः पश्यन् मरणमृच्छति॥"**

**मृन्मयीमिव यः पात्रीं कृष्णाम्बरसमावृताम्।**

**आदित्यमीक्षते शुद्धं चन्द्रं वा न स जीवति॥"**

**अपर्वणि यदा पश्येत्सूर्याचन्द्रमसोर्ग्रहम्।**

**अव्याधितो व्याधितो वा तदन्तं तस्य जीवितम्॥"**

**नक्तं सूर्यमहश्चन्द्रमनग्नौ धूममुत्थितम्।**

**अग्निं वा निष्प्रभं रात्रौ दृष्ट्वा मरणमृच्छति॥"**

**प्रभावतः प्रभाहीनान्निष्प्रभांश्च प्रभावतः।**

**नरा विलिङ्गान् पश्यन्ति भावान् भावाञ्जिहासवः॥"**

**व्याकृतानि विवर्णानि विसङ्ख्योपगतानि च।**

**विनिमित्तनि पश्यन्ति रूपाण्यायुःक्षये नराः॥"**

**यश्च पश्यत्यदृश्यान् वै दृश्यान् यश्च न पश्यति।**

**तावुभौ पश्यतः क्षिप्रं यमक्षयमसंशयम्॥"**[86] इति।

---

[86]. चरक.इन्द्रिय.4/7-18

**कर्णेन्द्रियस्य अरिष्टविशेषाः** – यः रोगी अशब्दं श्रुणोति, शब्दं च न श्रुणोति सः आशु म्रियते। अपि च यः रोगी कर्णद्वयं पिधायापि जाठराग्नेः ध्वनिं न श्रुणोति स गतायुः विज्ञेयः। उक्तञ्च –

**“अशब्दस्य च यः श्रोता शब्दान् यश्च न बुद्ध्यते।**

**द्वावप्येतौ यथा प्रेतौ तथा ज्ञेयौ विजानतः॥ ”**

**संवृत्त्याङ्गुलीभिः कर्णौ ज्वालाशब्दं य आतुरः।**

**न श्रुणोति गतासुं तं बुद्धिमान् परिवर्जयेत्॥ ”**[87] इति।

**घ्राणेन्द्रियस्य अरिष्टसूचनाः** – यः सुगन्धं दुर्गन्धः इति, दुर्गन्धं सुगन्ध इति वा जानाति स गतायुः विज्ञेयः। उक्तञ्च –

**विपर्ययेण यो विद्वान्गन्धानां साध्वसाधुतां।**

**न वा तान् सर्वशो विद्यात्तं विद्यात्गतायुषम्॥ ”**[88] इति।

**रसनेन्द्रियस्य अरिष्टसूचनाः** – यस्य रोगिणः रसज्ञानं न भवति, क्षीणं वा भवति, स गतायुः इत्यवगन्तव्यः। उक्तञ्च –

**“यो रसान्न विजानाति न वा जानाति तत्त्वतः।**

**मुखपाकादृते पक्कं तमाहुः कुशलाः नरम्॥ ”**[89] इति।

**स्पर्शनेन्द्रियस्य अरिष्टसूचनाः** – यः रोगी उष्णं शीतमिति इति, खरं श्लक्ष्णमिति, कोमलं कठिनमित्येवं विपरीतस्पर्शानुभवं करोति स गतायुः ज्ञेयः। उक्तञ्च –

**“उष्णाच्छीतान् खराञ्श्लक्ष्णान्मृदूनपि च दारणान्।**

**स्पृश्यान् स्पृष्ट्वा ततोऽन्यत्वं मुमूर्षुस्तेषु मन्यते॥ ”**[90] इति।

**सर्वेन्द्रियशक्तिविषयकाः अरिष्टसूचनाः** – यदि रोगी विना तपस्यां योगाभ्यासं करोति, इन्द्रियाणां शक्तिमतिरिच्य ज्ञानं च प्राप्नोति तर्हि तस्य मरणं सन्निहितमिति ज्ञेयम्। अपि च इन्द्रियाणामुलब्धिशक्तिं विना अपि यदि ज्ञानं प्राप्नोति तर्हि शीघ्रं पञ्चत्वमाप्नोति। यः स्वस्थोऽपि प्रज्ञाविपर्यासैः विकृतान् इन्द्रियार्थान् पश्यति सोऽपि आशु म्रियते। उक्तञ्च –

**“अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम्।**

**इन्द्रियैरधिकं पश्यन् पञ्चत्वमधिगच्छति॥ ”**

**“इन्द्रियाणामृते दृष्टेरिन्द्रियार्थानदोषजान्।**

**नरः पश्यति यः कश्चिदिन्द्रियैर्न स जीवति॥ ”**

**“स्वस्थाः प्रज्ञाविपर्यासैरिन्द्रियार्थेषु वैकृतम्।**

**पश्यन्ति येऽसद्बहुशस्तेषां मरणमादिशेत्॥ ”**[91] इति।

---

87. चरक.इन्द्रिय.4/19,20

88. चरक.इन्द्रिय.4/21

89. चरक.इन्द्रिय.4/22

90. चरक.इन्द्रिय.4/23

91. चरक.इन्द्रिय.4/24-26

**1.8. अन्तःकरणनिग्रहपूर्वकम् इन्द्रियजयः मोक्षसाधनम्**– शब्दस्पर्शादिविषयाणां ग्राहकानि इन्द्रियाणि, जीवं संसारचक्रे एव बन्धयन्ति। इन्द्रियाणि सर्वदा बहिर्मुखानि सन्ति स्वरूपदर्शनाय बाधकानि भवन्ति। उक्तमपि – "पराञ्चि पराक् अञ्चन्ति गच्छन्ति खानि तदुपलक्षितानि श्रोत्रादीनीन्द्रियाणि खानीत्युच्यन्ते। तानि पराञ्चि एव शब्दादिविषयप्राकाशनाय प्रवर्तन्ते।...तस्मात् पराङ् पराग्रूपान् अनात्मभूतान् शब्ददीन् पश्यत्युपलभते उपलब्धा नान्तरात्मन् अन्तरात्मनमित्यर्थः"[92]। अतः इन्द्रियाणां शब्दादिषु विषयेषु स्वाभाविकं रमणं निग्रहीतुं दुष्करम्। उक्तञ्च –

**"यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**

**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥"**[93] इति।

इन्द्रियार्थसंन्निकर्षद्वारा इष्टलाभादुत्पद्यमानं सुखं, वस्तूनामनित्यत्वात् तदलाभे दुःखकारणं सम्पद्यते। अतः विषयविषयिणी तृष्णा सर्वदा दुःखमेव जनयति। उक्तञ्च –"विषयविषया तृष्णा, दुःखमेव हि सा, न तृष्णायां सत्यां सुखस्य गन्धमात्रमुत्पद्यते"[94] इति। एवं विषयेषु दोषदर्शनेन, तेषु वैराग्यसम्पन्नं मनः इन्द्रियाणि विषग्रहणाय न प्रेरयति। उक्तञ्च – "विषयेषु दोषदर्शनाभ्यास–सामर्थ्यादिन्द्रियाणि संयतानि"[95] इति। विषयेषु अन्तःकरणस्य वैराग्यसिद्धौ मार्गे गच्छतः तृणस्पर्शवत् ज्ञानेन्द्रियैः गृहीतविषयेषु अनास्थया रागद्वेषाद्यभावेन अन्तःकरणं शुद्धं सम्पद्यते। एवमन्तःकरणस्य निग्रहेण इन्द्रियाणां जयः, इन्द्रियजये अन्तःकरणशुद्धिः इति आत्मज्ञानसिद्धये
इन्द्रियमनसोः परस्परं सहकारिता लक्ष्यते। उक्तञ्च –

**"यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।**

**तस्येन्द्रियाणि वश्यानि दुष्टाश्वाः इव सारथेः॥**

**यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा ।**

**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥"**[96],

"विधेयात्मा किङ्करीकृतमनास्तु आत्मवश्यैः मनोधीनैरिन्द्रियैः स्वामिनः चित्तस्य किङ्करीकृतस्य कामक्रोधविहीनत्वात् स्वयमपि रागद्वेषवियुक्तैः विषयान्पथि पतिततृणादीनिव अनास्थया चरन् पश्यन् अपि पुमान् तत्र कामाद्यनुदयात् प्रसादं सङ्कल्पविकल्पलेपप्रक्षालनेन मनसः स्वाच्छयमधिगच्छति। मनसः स्वाच्छयमेव प्रत्यगात्मनः स्वाच्छयं तस्य तद्गुणसारत्वात्। अजितमनस्कमिव जितमनस्कं विषयसङ्गो न बाधते अतः मनोजयः अवश्यं कर्तव्यः"[97] इति।

किञ्च सर्वोऽपि चित्तशुद्धिरहितः जीवः स्वाभाविकैः सत्त्वरजस्तमोगुणैः अथवा तत्प्रभवैः रागद्वेषादिभिः यत्किञ्चित् कर्म लोकिकं वैदिकं वा करोति[98]। अतः कश्चन औत्सुक्यमात्रेण कर्मेन्द्रियैः कर्माणि अकुर्वन् ज्ञानेन्द्रियैः विषयान् गृह्णन् रागद्वेषादिना दूषितान्तःकरणः भवति, स निश्चयेन कपटी। उक्तञ्च –

**"कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।**

**इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥"**[99] इति।

---

92. कठ.भा.2/1/1
93. भ.गी.2/60
94. गी.भा.2/67
95. आनन्दगिरी (गी.भा.) 2/61
96. कठ.उ.5/6
97. चतुर्धरी (गी.भा.)2/64
98. "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकत्।
    कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैः गुणैः॥ – भ.गी.3/5

अत: ज्ञानेन्द्रियाणां संयमपूर्वकं मनस: स्वच्छतासम्पादनेन एव जीव: परमपुरुषार्थभाक् भवति। कर्मसु अधिकृत: ज्ञानेन्द्रियाणां संयमद्वारेण चित्तशुद्धिं सम्पाद्य, कर्मफलेषु असक्त: सन् कर्म कुर्वन्नपि तै: न लिप्यते। उक्तञ्च – "हे अर्जुन! आश्चर्यमिदं पश्य यदेक: कर्मेन्द्रियाणि निगृहन् ज्ञानेन्द्रियाणि व्यापारयन् पुरुषार्थशून्य: अपरस्तु ज्ञानेन्द्रियाणि निगृह्य कर्मेन्द्रियाणि व्यापारयन् परममुरुषार्थभाग्भवति"[100],

**"कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**

**योगिन: कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।।** "[101] इति।

कर्मस्वनधिकृत: परिव्राजक: इन्द्रियसंयमधर्म: देहधारणमात्रव्यापार: लौकिकं वैदिकं वा कर्म अकुर्वन् अमृतत्त्वभाक् भवति। अत: उक्तं – "भिक्षो: धर्म: इन्द्रियसंयमादिलक्षण:।...परिव्राडेव अमृतत्त्वभाक्"[102] इति। इत्येवम् इन्द्रियनिग्रह: इत्यनेन ज्ञानेन्द्रियाणां निग्रह: एव इष्ट: इत्यपि अवगम्यते। तेषां निग्रहेण स्वच्छान्त:करण: आत्मदर्शनादत्यन्तं सुखमश्नुते। उक्तञ्च – "इन्द्रियाणां हि विषयसेवातृष्णात: निवृत्तिर्या तत् सुखम्"[103], यतेन्द्रियमनोबुद्धि: मुनिर्मोक्षपरायण:"[104],

**"विज्ञानसारथिर्यस्तु मन:प्रग्रहवान् नर:।**

**सोऽध्वन: पारमाप्नोति तद्विष्णो: परम पदम्।।** "[105] इति।

योगिन: अपि इन्द्रियजय: मोक्षकारणं प्रतिपादयन्ति। इन्द्रियजयश्च चित्तस्य निग्रहादेव भवति। योगाङ्गेषु प्राणायमाभ्यासस्य चित्तनिग्रह: फलमुक्तम्। उक्तञ्च – "धारणासु योग्यता मनस:"[106] इति। इन्द्रियाणां व्यापार: अन्त:करणव्यापाराधीन: इति हतो:, प्राणायामाभ्यासात् अन्त:करणस्य निरोधे तद्व्यापाराधीनानि इन्द्रियाणि अपि तद्वत् निरुद्धानि भवन्ति, स प्रत्याहार: उच्यते। तदुक्तं – "स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहार:"[107] इति। अस्य प्रत्याहारस्य अभ्यासेन इन्द्रियाणि नि:शङ्कं जितानि भवन्ति, सा इन्द्रियाणां परमा वश्यता उच्यते। तदुक्तं "तत: परमा वश्यता इन्द्रियाणाम्"[108] इति। एवमिन्द्रियाणां परमा वश्यता आत्मज्ञानसाधनं भवति। तदुक्तं – "सत्त्वशुद्धिसौमनस्य–ऐकाग्र्य–इन्द्रियजयात्मदर्शन–योग्यत्वानि च"[109] इति। एवमिन्द्रियजय: आत्मज्ञानसाधनमिति अद्वैतमते योगायुर्वेदशास्त्रयोश्च ऐकमत्येन प्रतिपाद्यते।

**सङ्केताक्षरसूची** –

| | |
|---|---|
| ईश.उ. | ईशावास्योपनिषत् |
| केन.उ. | केनोपनिषत् |
| कठ.उ. | कठोपनिषत् |
| मुं.उ. | मुण्डकोपनिषत् |

99. भ.गी.3/6
100. मधुसूदनीव्याख्या (गी.भा.) 3/7
101. भ.गी.5/11
102. सू.भा.3/4/20
103. गी.भा.2/67
104. भ.गी.5/28
105. कठ.उ.1/3/9
106. यो.सू.2/53
107. यो.सू.2/54
108. यो.सू.2/55
109. यो.सू.2/41

| | |
|---|---|
| मां.उ. | माण्डुक्योपनिषत् |
| प्र.उ. | प्रश्नोपनिषत् |
| तै.उ.शिक्षा. | तैत्तिरियोपनिषत् शिक्षावल्ली |
| तै.उ.ब्रह्म. | तैत्तिरियोपनिषत् ब्रह्मवल्ली |
| तै.उ.भृगु. | तैत्तिरियोपनिषत् भृगुवल्ली |
| ऐ.उ. | ऐतरेयोपनिषत् |
| बृ.उ. | बृहदारण्यकोपनिषत् |
| छां.उ. | छान्दोग्योपनिषत् |
| कौ.उ. | कौषीतकी उपनिषत् |
| श्वेत.उ. | श्वेताश्वतरोपनिषत् |
| भा. | शाङ्करभाष्यम् |
| ब्र.सू. | ब्रह्मसूत्रम् |
| सू.भा. | ब्रह्मसूत्र-शाङ्करभाष्यम् |
| भ.गी. | भगवद्गीता |
| गी.भा. | भगवद्गीता शाङ्करभाष्यम् |
| वे.परि. | वेदान्तपरिभाषा |
| सर्ववेदान्त. | सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः |
| पं.दशी. | पञ्चदशी |
| शास्त्रसिद्धान्त. | शास्त्रसिद्धान्तलेशसङ्ग्रहः |
| विवेक.चू. | विवेकचूडामणिः |
| अ.सिद्धि. | अद्वैतसिद्धिः |
| यो.सू. | योगसूत्रम् |
| चरक. | चरकसंहिता |
| सुश्रुत. | सुश्रुतसंहिता |
| माधव. | माधवनिदानम् |

**अनुशीलितग्रन्थसूची -**


1. श्रीशङ्करभगवत्पादाः (सं-एस्.सुब्रह्मण्यशास्त्री, मणिद्रविडः): उपनिषद्भ्याष्यम्/ दक्षिणामूर्ति मठ प्रकाशन, वारणासी / 2004.
2. श्रीशङ्करभगवत्पादाः (सं-आचार्य जगदीशशास्त्री) : ब्रह्मसूत्र-शाङ्करभाष्यम् (भाष्यरत्नप्रभया भामत्या न्यायनिर्णयेन च समुपेतम्)/ मोतिलाल बनारसीदास,वारणासी/ 2005.
3. श्रीशङ्करभगवत्पादाः (सं - वासुदेवशर्मा) : श्रीमद्भगवद्गीताभाष्यम् (अष्टटीकोपेतम्)/ चौखम्बा संस्कृत प्रतिष्ठान, वारणासी/ 2016
4. विद्यारण्यः स)वासुदेवशर्मा) : पञ्चदशी/ चौखम्बा संस्कृत सीरीज आफिस, वारणासी/ 2009.

5. अप्पयदीक्षत: (सं-एस्.आर्.कृष्णमूर्तिशास्त्री, डा.एन्.वीळीनाथन्) : शास्त्र-सिद्धान्त-लेश-सङ्ग्रहः (कृष्णालङ्कारव्याख्यया सहित:)/ श्रीमत्-अप्पय्यदीक्षितेन्द्र-ग्रन्थावलि-प्रकाशन-समिति:, वारणासी/ 2008.
6. धर्मराजाध्वरीन्द्र: (सं-प्रो.पारसनाथ द्विवेदी): वेदान्तपरिभाषा/ सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय:, वारणासी/ 2000.
7. पतञ्जलि: (सं-दुण्ढिराजशास्त्री):योगसूत्रम् (षट्टीकोपेतम्)/ चौखम्भा संस्कृत संस्थान, वारणासी/ 2016.
8. पतञ्जलि: (सं -स्वामी श्रीब्रह्मलीनमुनि:) : पातञ्जलयोगदर्शनम् (योगभाष्य-विवृत्तिव्याख्योपेतम्)/ चौखम्बा प्रकाशन, वारणासी/ 2017.
9. पतञ्जलि: (सं-श्रीरामशङ्करभट्टाचार्य:) : पातञ्जलयोगदर्शनम् (तत्त्ववैशारदी-व्यासभाष्यसमेतम्)/ भारतीय विद्या प्रकाशन, वारणासी/ 1963.
10. वाचस्पतिमिश्र: (सं न्यायाचार्य: श्रीरामशास्त्रीभण्डारी) : साङ्ख्यतत्त्वकौमुदी/ चौखम्भा संस्कृत संस्थान, वारणासी/ 1921.
11. सुश्रुत: (सं -डा.अम्बिकादत्त शास्त्री) :सुश्रुतसंहिता (आयुर्वेदतत्त्वसन्दीपिका-सहिता)/ चौखम्भा संस्कृत संस्थान, वारणासी/ 2018.
12. शाङ्र्गधर: (सं-विद्यासागर पण्डित परशुराम शास्त्री): शाङ्र्गधरसंहिता (दीपिका-गूढार्थदीपिकया संवलिता)/ चौखम्भा सुरभारती प्रकाशन, वारणासी/ 2018.
13. स्वात्मारामयोगीन्द्र:: हठयोगप्रदीपिका (ज्योत्स्ना-भाषाटीकोपेता)/ क्षेमराज-श्रीकृष्णदासश्रेष्ठी/ 2009.
14. अचार्य: दत्तात्रेय: : दत्तात्रेय-योगशास्त्रम्/ archive.org.
15. माधवकर: (सं-यदुनन्दनोपाध्याय):माधवनिदानम् (मधुकोश-विद्योतिनी व्याख्यासहितम्)/ चौखम्बा संस्कृत सीरीज आफिस्, वारणासी/ 2018.
16. वृद्धजीविकाचार्य: :काश्यपसंहिता (विद्योतिनीव्याख्यासहिता)/ चौखम्बा संस्कृत सीरीज, वारणासी/ 2010.